आस्कन्दनं, त्रि, (आङ्+स्कन्द+भावे ल्युट्।) तिरस्कारः। रणः। शोषणं। इति मेदिनी॥ (यथा किराते ६।२५। "चरणास्कन्दननामिताचलेन्द्रः"।)

आस्कन्दितं क्ली, (आङ्+स्कन्द+भावे+क्त।) अश्वगतिविशेषः। स च सम्यग्गतिः। इत्यमरः॥

आस्कन्दितकं, क्ली, (आस्कन्दितमेव स्वार्थे कन्।) आस्कन्दितं। अश्वानां पञ्चमगतिः। तत्पर्य्यायः। उत्तेरितं २ उपकण्ठं ३। इति हेमचन्द्रः॥
("उत्तेरितमुपकण्ठमास्कन्दितकमित्यपि।
उत्प्लुत्योत्प्लुत्य गमनं कोपादिवाखिलैः पदैः"।
हेमचन्द्रः॥)

आस्तरः, पुं, (आस्तीर्य्यतेऽसौ। आङ्+स्तॄ+अप्।) करिकम्बलं। इति हेमचन्द्रः॥ वस्त्राद्यास्तरणं॥ (यथा शान्तिशतके, २।१९। "वासो वल्कलमास्तरः किशलयान्योकस्तरूणां तलम्"॥)

आस्तरणं, क्ली, (आस्तीर्य्यते यत् येन वा आङ्+स्तॄ+कर्म्मणि करणे वा ल्युट्।) हस्तिपृष्ठस्थितचित्रकम्बलं। झुल इति भाषा। तत्पर्य्यायः। प्रवेणी २ वर्णः ३ परिस्तोमः ४ कुथा ५ कुथः ६। इत्यमरः॥ प्रवेणिः ७ परिष्टोमः ८ कुथं ९। इत्यमरटीका॥ (शय्या, कुशासनं। यथा रामायणे,२ काण्डे।
"राङ्कवास्तरणे पूर्व्वमयोध्यायामिवासने"।
महाभारते, आदिपर्व्वणि।
"दर्भास्तरणमास्तीर्य्य निश्चयात् धृतराष्ट्रजः"॥)

आस्तिकः, पुं, (अस्तीत्यस्य। अस्ति+ठक्।) मुनिविशेषः। स तु जरत्कारुमुनिपुत्त्रः। तत्पिता गर्भस्थं तं ज्ञात्वास्तीत्युक्त्वा गत इत्यस्मादास्तिकः। (यथा,—
"अस्तीत्युक्त्वा गतो यस्मात् पिता गर्भस्थमेव तम्।
वनं तस्मादिदं तस्य नामास्तिकेति विश्रुतम्"॥)
इति महाभारतम्॥
("आस्तिकस्य मुनेर्म्माता भगिनी वासुकेस्तथा"।
इति मनसाप्रणाममन्त्रः।)

आस्तिकः, त्रि, (अस्ति ईश्वर इति मतिर्यस्य। अस्ति+ठक्।) नास्तिकभिन्नः। ईश्वरोऽस्तीतिवादी। वेदप्रामाण्यवादी। तत्पर्य्यायः। श्रद्धालुः २ श्राद्धः ३। इति हेमचन्द्रः॥
("सत्यधर्म्मच्युतात् पुंसः क्रुद्धादाशीविषादिव।
अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः"॥
इति महाभारते आदिपर्व्वणि॥)

आस्तिकार्थदः, पुं, (आस्तिकस्य मुनेरर्थं सर्पसत्रात् निवृत्तिरूपप्रयोजनं ददाति यः। जनमेजयो राजा आस्तिकमुनिवचनात् सर्पयज्ञात् विरराम इति पौराणिकी कथा।) जनमेजयो राजा। इति शब्दरत्नावली॥

आस्तीकः, पुं, आस्तिकमुनिः। इति त्रिकाण्डशेषः॥

आस्तीकजननी, स्त्री, (आस्तीकस्य जननी माता, षष्ठीतत्पुरुषः।) आस्तिकमाता। मनसा देवी। इति शब्दरत्नावली॥

आस्था, स्त्री, (आङ्+स्था+अङ्+टाप्।) यत्नः। आलम्बनं। आस्थानं। अपेक्षा। इति मेदिनीकारहेमचन्द्रौ॥ (श्रद्धा। आदरः। प्रतिष्ठा। यथा, रघौ १०।४३।
"दैवात् स्वर्गादवध्यत्वं मर्त्त्येष्वास्थापराङ्मुखः"।
"विनश्वरे विहायास्थां यशः पालय मित्र मे"।
इति हितोपदेशः॥)

आस्थानं, क्ली, (आस्थीयतेऽस्मिन् इति। आङ्+स्था+ल्युट्।) सभा। इत्यमरः। (यथा, किराते १।१६। "अनेकराजन्यरथाश्वसंकुलं
तदीयमास्थाननिकेतनाजिरम्"।)
यत्नः। इत्यजयः॥ (आश्रयः। स्थानम्।)

आस्थानी, स्त्री, (आस्थान+ङीप्।) सभा। इत्यमरः॥ ("आस्थानीं समये समं नृपजनः सायन्तने सम्पतन्"। इति रत्नावली।)

आस्पदं,क्ली, (आपद्यतेऽस्मिन् इति। आस्पदं प्रतिष्ठायामिति निपातनात् सुट्।) प्रतिष्ठा। कर्म्म। इत्यमरः॥ प्रभुत्वं। इति धरणी। स्थानं। इति हेमचन्द्रः॥ ("रागस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्ययः"। इति नागानन्दे। तथा च रघौ ३।३६।
"नरेन्द्रमूलायतनादनन्तरं
तदास्पदं श्रीर्युवराजसंज्ञितम्"।)

आस्पन्दनं, क्ली, (आङ्+स्पन्द+ल्युट्।) स्पन्दनं। कम्पनम्॥

आस्फालः, पुं, (आङ्+स्फुल्+घञ्।) हस्तिकर्णास्फालनं। हातिर काण नाड़ा इति भाषा। तत्पर्य्यायः। झलज्झला। इति हारावली-त्रिकाण्डशेषौ॥ (आस्फालनं। सञ्चालनं।)

आस्फालनं, क्ली, (आङ्+स्फल्+णिच्+ल्युट्।) आटोपः। प्रागल्भ्यम्॥ (यथा रघौ ६ ७३।
"ऐरावतास्फालनविश्लथं यः
सङ्घट्टयन्नङ्गदमङ्गदेन"।)

आस्फुजित्, पुं, (आस्फु+जि+क्विप्।) शुक्राचार्य्यः। इति त्रिकाण्डशेषः॥

आस्फोटः, पुं, (आङ्+स्फुट्+अच्।) आस्फोतवृक्षः। इति शब्दरत्नावली॥ आकन्द इति भाषा। शूरादेर्बाहादिशब्दः। इति श्रीभागवतम्॥ ("कक्षैः कक्ष्यां विधुन्वानावास्फोटं तत्र चक्रतुः"। इति महाभारते सभापर्व्वणि।)

आस्फोटकः, पुं, (आङ्+स्फुट्+ण्वुल्।) पर्व्वतजपीलुवृक्षः। इति शब्दमाला॥ आकरोट इति भाषा।

आस्फोटनं,क्ली, (आङ्+स्फुट्+ल्युट्।) विकाशः। मुद्रणं। इति धरणी॥ बाह्वादिशब्दः। ताल ठोका इत्यादि भाषा॥ (यथा रामायणे ५ काण्डे।
"आस्फोटननिनादांश्च बालानां तत्र खेलताम्"॥
धान्यादेस्तुषविश्लेषकरणम्।)

आस्फोटनी, स्त्री, (आस्फुट्यतेऽनया। स्फुट्+करणे-ल्युट्+ङीप्।) वेधनिका। इत्यमरः॥ तुरपन भ्रमर इत्यादि भाषा।

आस्फोटा, स्त्री, (आस्फोटयतीति। आङ्+स्फुट्+अच्+टाप्।) नवमल्ली। वनमल्ली। इति शब्दरत्नावली॥ (नवमल्लीशब्देऽस्या विशेषो ज्ञेयः।)

आस्फोतः, पुं, (आस्फोटयतीति। आङ्+स्फुट्+अच्+पृषोदरादित्वात् साधुः।) अर्कवृक्षः। कोविदारकवृक्षः। इति मेदिनी॥ भूपलाशवृक्षः। इति शब्दचन्द्रिका॥ (यथा, वाभटे।
("मूलं सप्ताङ्गात्त्वक्शिरीषाश्वमारादर्कान्मालत्याश्चित्रकास्फोतनिम्बात्।
बीजं कारञ्जं सार्षपं प्रापुनाटं
श्रेष्ठा जन्तुघ्नं क्षूषणं द्वे हरिद्रे"॥)

आस्फोतकः, पुं, (आस्फोत एव स्वार्थे कन्।) अर्कवृक्षः। इति राजनिर्घण्टः॥

आस्फोता, स्त्री, (आस्फोत+टाप्।) अपराजिता। वनमल्लिका। इति मेदिनी॥ सारिवावृक्षः। इति राजनिर्घण्टः। वृक्षविशेषः। हापरमाली इति ख्याता। अस्या गुणौ। कुष्ठविषरोगनाशित्वं। इति राजवल्लभः॥

आस्यं, क्ली, (अस्यते ग्रासोऽस्मिन् इति असु क्षेपणे ऋहलोर्ण्यत् इति ण्यत्। यद्वा आस्यन्दते अस्माद्दिना प्रस्रवति इति स्यन्दू प्रस्रवणे+ड।) मुखं। मुखमध्यम्। (यथा, मनुः १।९५।)
("यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः"।)
(आस्ये भवमास्यं।) मुखभवे त्रि। इति मेदिनी॥

आस्यपत्रं,क्ली, (आस्यमिव पत्राणि यस्य तत्।) पद्मं। इति शब्दचन्द्रिका।

आस्यलाङ्गलः, पुं, (आस्यं लाङ्गलं भूविदारकयन्त्रमिव यस्य।) शूकरः। इति हेमचन्द्रः॥

आस्यलोम, [न्] क्ली, (आस्यस्य लोम।) श्मश्रु। इति हेमचन्द्रः॥

आस्या, स्त्री, (आस्+ण्यत्।) स्थितिः। इत्यमरो मेदिनी च॥ (आसनं, इति वैद्यमाधवकररोगविनिश्चयसंग्रहे। यथा,—
"आस्यासुखं स्वप्नसुखं दधीनि"
सुश्रुतेऽस्या गुणा यथा,
"आस्या वर्णकफस्थौल्यसौकुमार्य्यकरी सुखा"।)

आस्यासवः, पुं, (आस्यस्य मुखस्य आसव इव।) लाला। इति हेमचन्द्रः॥ थुतु लाल इत्यादि भाषा।

आस्रपः, पुं, (आस्रं पिबतीति। आस्र+पा+क।) मूलानक्षत्रं। इति हेमचन्द्रः॥ (राक्षसः।)

आस्रवः, पुं, (आङ्+स्रु+अच्।) क्लेशः। कष्टं। इत्यमरः॥

आह, व्य, (उवाच इत्यर्थे कालमात्रे निपातोऽयं।) क्षेपः। नियोगः। इति मेदिनी॥ दृढ़सम्भावनं। इति शब्दरत्नावली॥

आहकज्वरः, पुं, (आहको नासारोग एव ज्वरः।) नासारोगविशेषः। नासाज्वर इति ख्यातः। तस्य लक्षणम्।
"तनुना रक्तशोथेन युक्तो नासापुटान्तरे।
गात्रशूलज्वरकरः श्लेष्मणा ह्याहकः स्मृतः"॥
इति वैद्यकम्॥ (आहव इति क्वचिद्वैद्यके पाठः। तद्यथा, आहवज्वरस्य लक्षणम्।
"शोथः सरक्तो नासायां व्यथास्रावौ ज्वरस्तथा।
वातश्लेष्मास्रगुत्थश्च आहवाख्यं विनिर्द्दिशेत्"।